# उल्लासः

## प्रवेशिका, प्रथमः भागः



राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

# आमुखम्

राष्ट्रिय-शिक्षा-नीतिः २०२० पञ्चदश-वर्षीयाणाम् अथवा ततः अधिक-आयुःवर्गीयाणां सर्वेषाम् तेषां सर्वेषाम् अपि जनानां साक्षरतानिमित्तम् अवसरनिर्माणे प्रतिबद्धतां करोति। ये जनाः कैश्चिदपि कारणैः अक्षर-संख्ययोः ज्ञानम् अर्जयितुं न शक्तवन्तः। सन्दर्भेऽस्मिन् इति कार्यक्रमः शिक्षा-नीतेः अनुशंसानां क्रियान्वयनार्थं भारत-सर्वकारेण २०२२ तमे वर्षे अप्रेल-मासस्य प्रथमे दिनाङ्के 'उल्लासः' प्रारब्धः। यस्मिन् वयस्क-शिक्षायाः सर्वेऽपि पक्षाः समायोजिताः सन्ति। उल्लासस्य उद्देश्यं केवलम् आधारभूत-साक्षरता एवञ्च संख्याज्ञानम् एव न अस्ति, अपितु २१ शताब्दस्य नागरिकाणां कृते ये आवश्यकाः घटकाः भवन्ति तेषाम् अपि समायोजनम् अत्र क्रियते यथा – महत्त्वपूर्णानि जीवन-कौशलानि (वित्तीय-साक्षरता, अङ्कीय-साक्षरता (डिजिटल-साक्षरता), वाणिज्य-कौशलम्, स्वास्थ्य-संरक्षणम्, जागरूकता, शिशुसंरक्षणम्, शिक्षा एवं परिवारकल्याणम्), व्यावसायिक-कौशल-विकासः (स्थानीय-वृत्तिम् उद्दिश्य) आधारभूता शिक्षा (प्रारम्भिकम्, माध्यमिकं माध्यमिकस्तरस्य च समकक्षतायाः सहितम्) एवञ्च सतत-शिक्षा (कला, विज्ञानम्, प्रौद्योगिकी, संस्कृतिः, क्रीडा मनोरञ्जनं च इत्यादिषु समग्र-प्रौढशिक्षा-पाठ्यक्रमेण सहैव स्थानीयानां शिक्षार्थिनां कृते रुचेः उपयोगस्य च अन्ये विषयाः यथा – महत्त्वपूर्ण-जीवन-कौशलेषु अधिकोन्नतसामग्र्या सह)। अनेन प्रकारेण इयं योजना मानवस्य व्यक्तित्व-विकासं समग्रतया अवलोकयति एवञ्च न्यायसंगतं, तर्कशीलम् एवञ्च उत्कृष्टस्य नागरिकस्य निर्माण-दिशि कार्यं करोति।

'उल्लास'स्य अर्थः वर्तते – समाजे सर्वेषां जनानां कृते आजीवनम् अधिगमस्य बोधः। (ULLAS- Understanding of Lifelong Learning for All in Society) एवञ्च 'जन जन साक्षर' इति उल्लासस्य आदर्शवाक्यं वर्तते। नव-भारत-साक्षरता-कार्यक्रमस्य उल्लासस्य अभिलेखे उल्लिखितं वर्तते यत् २०११ तमे वर्षे कृतायाः जनगणनायाः अनुसारेण देशे पञ्चदश-वर्षीयाणां ततः अधिक-आयुवर्गीयाणां वा अक्षरज्ञानविहीनानां जनानां सङ्ख्या २५.७६ कोटिः (पुरुषाः ०९.०८ कोटिः, महिलाः १६.६८ कोटिः) वर्तते। २००९-२०१० वर्षतः २०१७-२०१८ वर्ष-पर्यन्तं साक्षर-भारत-कार्यक्रमस्य अन्तर्गतं प्रमाणितानां साक्षर-जनानां सङ्ख्यायां ०७.६४ कोटि-परिमितस्य प्रगतिम् अवलोक्य अनुमियते यत् भारते अधुना अपि प्रायः १८.१२ कोटि-परिमिताः वयस्काः अक्षरज्ञानविहीनाः सन्ति।" राष्ट्रिय-शिक्षा-नीतिः २०२० तः २०३० वर्ष-पर्यन्तं १०० प्रतिशतं शतप्रमाणकं साक्षरतार्थं लक्ष्यं निर्धारयति एवञ्च राष्ट्रिय-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-परिषदि राष्ट्रिय-साक्षरता-केन्द्रस्य स्थापनायाः अनुशंसां करोति। अस्य लक्ष्यस्य प्राप्तये राष्ट्रियस्तरे राज्यस्तरे च अनेके प्रयासाः नैरन्तर्येण क्रियमाणाः सन्ति क्रियन्ते।

भवितुमर्हति यत् उल्लासे सम्मिलिताः शिक्षार्थिनः साक्षराः न भवेयुः चेदपि ते शिक्षिताः अवश्यं भविष्यन्ति एवञ्च स्वजीवने समागतानां सङ्गर्षाणां तथा विभिन्न-आह्वानानां च सम्मुखीकर्तुम् एवं च जीवने उचितं निर्णयं स्वीकर्तुं समर्थाः भविष्यन्ति। एते शिक्षार्थिनः स्व-जीवनस्य विविधेषु सन्दर्भेषु स्वभाषायाः अन्यभाषाणां वा मौखिक प्रयोगं च कुर्वन्ति एवञ्च गणितीयावबोधेन सह स्व-कार्येषु विनिमयम् अपि कुर्वन्ति। पठनं लेखनं सङ्ख्याज्ञानं चैव एतेषाम् आवश्यकता यया तेषां गुणवत्तापूर्णस्य च जीवनस्य मार्गः प्रशस्तः भवेत्।

साक्षरता काचित् बृहदवधारणा वर्तते, या केवलम् अक्षरज्ञान-सङ्ख्याज्ञान-पर्यन्तं परिसीमिता नास्ति, अपितु "विभिन्नेषु सन्दर्भेषु विषयाणां दृश्य-श्रव्य-अङ्कीय-उपकरणानाम् उपयोगेन सञ्ज्ञानस्य, अवगमनस्य, रचनायाः, गणनायाः संवादस्य च क्षमता वर्तते ।" (अन्ताराष्ट्रिय-साक्षरता-सङ्घः (आई.एल.ए.) उद्धृतम् ) । अनेन प्रकारेण आधारभूत-साक्षरता संख्याज्ञानं च प्रकार्यात्मकम् अस्ति, एवञ्च उत्तमतया जीवनयापने सहायकम् अस्ति।

"आधारभूत-साक्षरतायाः प्राप्तिः, शिक्षायाः प्राप्तिः, जीवनोपार्जनस्य च अवसर-प्राप्तिः प्रत्येकं भारतीयस्य अधिकारः अस्ति। साक्षरता एवञ्च आधारभूत-शिक्षा कस्यचिदपि वैयक्तिकम्, नागरिकम्, सामाजिकम्, आर्थिकम् एवञ्च जीवनपर्यन्तं शिक्षायाः अवसराणाम् अनेकानि नूतनस्य जगतः द्वाराणि उद्घाटयति। एतत् नूतनं जगत् वैयक्तिकस्तरे व्यावसायिकस्तरे च अभिवर्धनार्थं सहायकं भवति ।" राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्याः परिप्रेक्ष्यं (विषयम्) मनसि संस्थाप्य शिक्षामन्त्रालयस्य नवभारत-साक्षरता-कार्यक्रमस्य अन्तर्गतं निरक्षराणां शिक्षार्थिनां कृते चतुर्षु भागेषु एतस्याः उल्लास-प्रवेशिकायाः निर्माणं कृतम् अस्ति। एताः प्रवेशिकाः समेकितरूपेण निर्मिताः सन्ति, यासु गणितं भाषा च द्वयमपि सम्मिलितम् अस्ति। विषयरूपेण १३ विषयाः सुनिश्चिताः सन्ति ये प्रायः अस्माकं समीपे दृश्यन्ते श्रूयन्ते प्रयोज्यन्ते च । ते च विषयाः – परिवारः प्रतिवेशः च, संवादः, अस्माकं जीवनशैली, अस्माकं परिवेशः, आहारः स्वास्थ्यं च, मतदानम्, न्यायसम्बद्धं ज्ञानम्, विभिन्नाः आपदः, समयः एव करोति बलाबलम्, यात्रा, मनोरञ्जनम्, वित्तीय-साक्षरता, अङ्कीय-साक्षरता इति । भाषायाः अन्तर्गतम् एतैः विषयैः एव युक्तानि सार्थकानि रोचकवस्तूनि एवञ्च प्रतिदिनम् आवश्यकानाम् आयव्ययादीनां ज्ञानाय संस्कृतभाषायाः अंकगणितस्य च पठनाय अवसराः कल्पिताः सन्ति। शिक्षार्थिनां पठनस्य लेखनस्य अंकगणितस्य च शिक्षणाय सारल्यं भवेत् इत्येतदर्थम् एतस्याः मार्गदर्शिकायाः अपि निर्माणं कृतम् अस्ति । एषा मार्गदर्शिका शिक्षकाणां सहयोगिनां च उपयोगाय निर्मिता वर्तते। अनेन शिक्षार्थिनां शिक्षणे इतोऽपि सारल्यं भविष्यति। अस्यां मार्गदर्शिकायां साक्षरतायाः व्यापकं परिप्रेक्ष्यं, भाषायाः गणितस्य च शिक्षणबिन्दवः एवञ्च अधिगमप्रक्रियायाः विषये विस्तृता चर्चा वर्तते। प्रवेशिकासु मार्गदर्शिकायां च प्रदत्ताः बिन्दवः परामर्शाय वर्तन्ते। शिक्षार्थिनां स्तरं, क्षमताम्, आवश्यकताः एवञ्च स्थानीय-परिवेशं ज्ञात्वा एतेषु आवश्यकतानुसारं परिवर्तनं कर्तुं शक्यते।

**'उल्लासः'** प्रवेशिकायां प्रामुख्येण सुविचार्य शिक्षार्थिनां स्वयंसेविनां शिक्षकाणां च कृते आधारभूत-साक्षरतया संख्याज्ञानेन च सम्बद्धानां शिक्षणबिन्दूनाम् अन्तर्जालीय-प्रतिमानानाम् अथवा चलच्चित्राणां निर्माणम् अपि कृतम् अस्ति, यत् 'दीक्षामञ्चे' (DIKSHA Portal) सर्वेषां कृते शिक्षा (सभी के लिये शिक्षा) इति वर्टिकल एवञ्च एनसीईआरटी इत्यस्य 'यूट्यूब चैनल' @NCERTOFFICIAL इत्यस्मिन् उपलब्धम् अस्ति। मार्गदर्शिकायाः चलच्चित्रकार्यक्रमस्य च सहयोगेन शिक्षार्थिनां शिक्षणाधिगमे सहयोगः प्राप्यते।

परिषद् प्रवेशिकानां मार्गदर्शिकानां च निर्माणे सम्मिलितानां सर्वेषाम् अपि विषय-विशेषज्ञानाम् एवञ्च परिषदः संकाय-सदस्यानां परियोजनायाः कार्यकर्तॄणां च परिश्रमस्य कृते कृतज्ञतां प्रकटयति। तथैव तेषां सर्वेषां रचनाकाराणां संस्थाः प्रति अपि वयं कृतज्ञाः स्मः, ये याश्च अस्माकं पुस्तके स्वस्य सामग्रीः प्रयोक्तुम् उदारतापूर्वकं सहयोगं कृतवन्तः / कृतवत्यः । एतासां प्रवेशिकानां परिष्कारार्थम् उत्तरोत्तरम् अभिवर्धनार्थं च भवतां/भवतीनां परामर्शानां वयं स्वागतं कुर्मः ।

दिनेश प्रसाद सकलानी
निदेशकः
राष्ट्रिय-शैक्षिक-अनुसंधानम्
एवञ्च प्रशिक्षण-परिषद्

सितंबरमासः २०२४
नवदेहली

# स्वयंसेवि-शिक्षकैः सह वार्तालापः

आधारभूतसाक्षरता सङ्ख्याज्ञानं च (प्रौढशिक्षा) भारतसर्वकारद्वारा प्रायोजितायाः उल्लास-नामक-योजनायाः कश्चन महत्त्वपूर्णः भागः । यस्य उद्देश्यं तु पञ्चदशवर्षीयाणां पञ्चदशाधिकवर्षीयाणां च शिक्षार्थिनां साक्षरता वर्तते। उल्लासयोजनायां तेषां/तासां पठन-लेखनयोः सङ्ख्यायाः च शिक्षणं कर्तव्यम्, ये/याः केनापि कारणेन विद्यालयीयशिक्षां न प्राप्तवन्तः/प्राप्तवत्यः अथवा न अनुवर्तितवन्तः/अनुवर्तितवत्यः। अतः सामाजिकचेतनाकेन्द्रं ये निरक्षराः शिक्षार्थिनः आगच्छन्ति अथवा अन्ये भवतां सम्पर्के ये निरक्षराः शिक्षार्थिनः सन्ति, ते पठन-लेखन-प्रक्रियायां विभिन्नस्तरयुक्ताः भवितुम् अर्हन्ति।

अस्माभिः इदम् अपि अवगन्तव्यं यत् एते शिक्षार्थिनः विवेकिनः, जीवनानुभविनः च सन्ति इति। ते प्रतिकूलपरिस्थितौ अपि जीवनं यापितवन्तः एवञ्च परिस्थितिम् अनुकूलां कर्तुम् अपि जानन्ति। प्रायः एतेषु बहवः गृहे अथवा बहिः कस्मिंश्चित् कार्ये संलग्नाः अथवा किमपि उत्तरदायित्वं निर्वहन्तः स्युः। एतद् अस्माकम् उद्देश्यम् अस्ति यत् पठनलेखनाभ्यासेन एवञ्च गणितज्ञानेन तेषां जीवनं इतोऽपि सरलं भवेत्, एवञ्च तेषाम् अनुभवं ते इतोऽपि गभीरं विस्तृतं च कर्तुं शक्नुयुः इति। एतेन प्राप्तां क्षमतां जीवनस्य विभिन्नासु परिस्थितिषु उपयोक्तुम् अपि शक्नुयुः। एतेन तेषाम् आत्मविश्वासः इतोऽपि वर्धेत।

**स्वयंसेवि-शिक्षकैः एतत् ज्ञातव्यम्** –

- यान् शिक्षार्थिनः वयं साक्षरान् कर्तुम् इच्छामः ते पञ्चदशवर्षीयाः पञ्चदशाधिकवर्षीयाः च सन्ति। कदाचित् ते अस्माकम् अपेक्षया अनुभविनः स्युः। अतः अस्माभिः तेषाम् अनुभवस्य आदरः करणीयः।
- ते स्वीयानि नित्यकार्याणि स्वीयशैल्या एव कुर्वन्ति। तेषां कौशलस्य अपि अस्माभिः आदरः करणीयः।
- पठनम् उपयोगीति यदा ते चिन्तयेयुः तदा एव ते पठेयुः। पूर्णतया सिद्धाः भूत्वा एव तान् अध्यापयन्तु येन अधिगमस्य पूर्णं लाभं ते प्राप्तुं शक्नयुः। एतद्द्वारा वयं बहु किमपि नूतनं ज्ञातुं शक्नुमः एवञ्च अस्माकम् आत्मविश्वासः अपि वर्धेत। अतः वयं पूर्णतया सिद्धाः भूत्वा परिश्रमेण आदरेण च शिक्षार्थिनः पाठयेम।
- **उल्लास**-प्रवेशिका संस्कृतभाषायाः गणितस्य च एकीकृतं स्वरूपम् अस्ति। अत्र प्रत्येकं पाठे संस्कृतभाषायाः क्षमतानां गणितीयक्षमतानां च विकासाय पर्याप्तावसराः कल्पितास्सन्ति।
- शिक्षार्थिनः प्रायः संस्कृतेन भाषितुं संस्कृतम् अवगन्तुं च समर्थाः एव, किन्तु पठनस्य लेखनस्य वा अवसरः न प्राप्तः इत्यतः ते पठने लेखने च कष्टम् अनुभवन्ति। केषाञ्चित् शिक्षार्थिनाम् अक्षरज्ञानम् अपि स्यात्। एवमेव कश्चन गणितस्य मौखिकप्रयोगे कुशलः स्यात् एवञ्च अनौपचारिकरूपेण गणनां कर्तुम् अपि समर्थः स्यात्, किन्तु अङ्कानाम् अवगमने गणितीय-समस्यानां च परिहारे समस्या स्यात्।

- पाठेषु सर्वेषां चित्राणां, कथानां, कवितानाम् अथवा अन्यस्याः कस्याश्चित् रोचक-सामग्र्याः माध्यमेन संस्कृतभाषायाः अक्षराणि, नूतनशब्दाः, पाठ्यवस्तुनः पठनं लेखनं च शिक्षितम् अस्ति। अस्याः एव पाठ्य-सामग्र्याः सन्दर्भे गणिताङ्काः गणनं च गणितीय-समस्यानां समाधानं च शिक्षितम्। यदि अपेक्षितं तर्हि वयम् अस्माकम् इच्छानुसारं शिक्षण-बिन्दूनाम् आधारेण अन्यासां पाठ्य-सामग्रीणाम् अपि उपयोगं कर्तुं शक्नुमः। वयं शिक्षार्थिनां स्तरानुसारं, क्षमतायाः अनुसारम् आवश्यकतानाम् अनुसारं च पाठ्य-सामग्र्याः सङ्ग्रहणं कर्तुं शक्नुमः।
- प्रवेशिकायां प्रदत्तानां चित्राणां पूर्णतया प्रयोगं कर्तुं शक्नुमः। अनुमानेन पठनं लेखनं च शिक्षयितुं चित्राणि सहायकानि भवन्ति। कस्मिंश्चित् चित्रे एकम् एव वस्तु भवितुम् अर्हति। कस्मिंश्चित् चित्रे काचित् पूर्ण-प्रक्रिया घटना वा भवितुम् अर्हति। अतः आवश्यकतायाः अनुसारं चित्राणां प्रयोगं कर्तुं शक्नुमः। चित्राणि शिक्षार्थिनः चर्चां कर्तुं वा स्वानुभवान् वक्तुं वा प्रेरयन्ति।
- ***उल्लास-प्रवेशिकायाः*** लेखनार्थं शिक्षार्थिभ्यः प्रथमपृष्ठे विशेषरूपेण पर्याप्तं स्थलं प्रदत्तम् अस्ति तत्र ते स्वस्य नाम, गृहसङ्केतं, सम्पर्कविवरणानि (चलदूरवाणी-सङ्ख्या इत्यादि) लेखितुं शक्नुवन्ति। शिक्षार्थिनः स्वजीवने स्वस्य नाम-आदिकं लेखितुम् अनेकान् अवसरान् प्राप्नुवन्ति। एतत् कार्यं तेषां जीवनेन सह सम्बद्धम् अस्ति। कदाचित् कश्चन शिक्षार्थी स्वस्य नाम लेखितुं न शक्नुयात्। तदा अध्यापकः तस्य नाम, गृहसङ्केतं, चलदूरवाणी-सङ्ख्यां च लिखित्वा प्रदर्शयेत्। दृष्ट्वा लेखितुं शिक्षार्थिनः सहायतां च कुर्यात्।
- ***उल्लास-प्रवेशिकायाः*** चतुर्णाम् अपि भागानाम् अन्ते संस्कृतभाषायाः वर्णमाला प्रदत्ता अस्ति। अस्याः उद्देश्यम् अस्ति यत् शिक्षार्थिनः संस्कृतभाषायाः अक्षराणि अवगच्छन्तु इति। परन्तु अस्य आरम्भः तु उचितसामग्र्या एव भवेत्। यदा ते अक्षराणां परिचयं प्राप्नुवन्ति तदा वर्णमाला-द्वारा अक्षराणाम् अवगमनं कारयितुं शक्यते। यः शिक्षार्थी पूर्वमेव संस्कृतभाषायाः अक्षराणि जानाति सः वर्णमाला-युक्तस्य पृष्ठस्य उपयोगम् आरम्भे एव कर्तुं शक्नोति।
- संस्कृत-वर्णमालायाः पुनः पुनः दर्शनेन शिक्षार्थिनाम् अक्षराणां सञ्ज्ञानं सुदृढं भवति। ते अनुमानेन अक्षराणाम् अवगमनार्थं पठनार्थं लेखनार्थं च अस्य कौशलस्य उपयोगं कर्तुं शक्नुवन्ति।
- संस्कृतस्य अक्षराणाम् अवगमनार्थं भाषा-क्रीडानाम् आयोजनं कर्तुं शक्यते। उदाहरणार्थम्–संस्कृतस्य केनचित् निर्दिष्ट-अक्षरेण शब्दनिर्माणम्, कस्यचित् शब्दस्य अन्तिम-अक्षरेण अग्रिमशब्दस्य निर्माणम्, शब्दानां पठनम् इत्यादयः। निर्दिष्टमात्रया युक्तस्य शब्दस्य निर्माणम्, पठनं लेखनम् इत्यादि-क्रीडाः अपि कारयितुं शक्यते।
- संस्कृत-अक्षराणाम् अक्षर-जालं निर्माय तस्मिन् जाले शब्दानाम् अन्वेषणं कर्तुं सूचयतु। एतस्मिन् अक्षर-जाले ज्ञातानाम् अक्षराणां मात्राणां च उपयोगः भवतु।
- प्रवेशिकायाः अन्ते प्रदत्तां वर्णमालां शिक्षार्थिनः पठनसमये लेखनसमये वा कदापि द्रष्टुं शक्नुवन्ति। पठनार्थं लेखनार्थं च ते वर्णमालायाः प्रयोगं कर्तुं शक्नुवन्ति।

**शिक्षार्थिनाम् अध्यापन-काले ध्यातव्याः विषयाः**

- **स्वशिक्षार्थिनः जानन्तु** – अस्माभिः ज्ञातव्यं यत् ते शिक्षार्थिनः सर्वथा पठितुं लेखितुं न शक्नुयुः, अथवा पूर्वमेव किञ्चित् पठितुं जानीयुः, अथवा केवलम् अक्षराणि एव परिचिनुयुः, अथवा केवलं स्वनाम लेखितुं शक्नुयुः। इदमपि स्यात् यत् तेषां सङ्ख्याज्ञानं न स्यात् अथवा ते गणितीयसङ्ख्याः औपचारिकगणनाविधीन् च जानीयुः। तेषां रुचिः, अरुचिः, सुखम्, दुःखम्, परिवारः, चिन्ता, संघर्षाः च ज्ञातव्याः, येन यदा वयं शिक्षण-अधिगमप्रक्रियाम् आरभामहे तदा तेषां जीवनस्य घटनाः मनसि कृत्वा वार्तालापं कर्तुं शक्नुयाम। ते अस्माकं वार्तालापेन प्रोत्साहनं प्राप्य सशक्तताम् अनुभवेयुः। अस्माकम् आत्मीयता तेषां जीवनस्य अनेकेभ्यः दुःखदायकेभ्यः पक्षेभ्यः तेषां ध्यानं विचालयितुं शक्नुयात्।
- **शिक्षण-अधिगम-क्रिया मनोरञ्जनात्मिका भवेत् -** भवन्तं / भवतीं परितः बहूनि वस्तूनि भविष्यन्ति यानि पाठस्य अध्यापनार्थम् उपयोगीनि भवितुम् अर्हन्ति। पाठनसम्बद्धानाम् उपलब्धानां सामग्रीणां यथा - वार्तापत्रम्, पत्रिका, विज्ञापनम्, विद्युद्-व्यय-पत्रकम्, रेलयानस्य चिटिका च इत्यादीनां समुचितरूपेण उपयोगं कुर्वन्तु।
- **शिक्षार्थिभ्यः स्वविचारान् प्रकटयितुम् अवसराः कल्पनीयाः** – शिक्षण-काले स्वयमेव अधिकं न वक्तव्यम्, अपितु शिक्षार्थिभ्यः चर्चां कर्तुं स्वविचारान् प्रकटयितुं च पर्याप्ताः अवसराः प्रदातव्याः। एतत् भवितुमर्हति यत् वयं बहु-सूचनां दातुम् इच्छामः, परन्तु अस्माभिः स्मर्तव्यं यत् अस्माकं शिक्षार्थिनः पूर्वमेव बहु किमपि जानन्ति, अतः तेषां ज्ञानस्य अनुभवानां च लाभं स्वीकर्तुं शक्नुमः। तदर्थं तेषां धन्यवादज्ञापनं न विस्मरणीयम्।
- **अतिरिक्त-पठन-सामग्रीणां प्रयोगं कुर्वन्तु** – उल्लास-प्रवेशिकायाः प्रत्येकं पाठं पठित्वा तत्सम्बद्धानां विभिन्नप्रकारकाणां सार्थक-पठन-सामग्रीणां सङ्ग्रहणं कुर्वन्तु, एषा सामग्री रुचिकरी भवेत् एवञ्च समीपे एव उपलब्धा भवेत्। अनेन पठितस्य पाठस्य अवगमनं सौकर्याय भविष्यति, शिक्षार्थिनः तया सह सम्बद्धाः भवितुम् अर्हन्ति।
- **शिक्षार्थिनः प्रति संवेदनशीलः सकारात्मकः च दृष्टिकोणः भवेत्** – यदि वयं वयसा कनिष्ठाः स्मः, ते ज्येष्ठाः सन्ति, तर्हि ते अस्माकं कथनं गभीरतया न शृण्वन्ति इति न चिन्तनीयम्। ते, भवतः बहु सम्माननं प्रेम च करिष्यन्ति, यतो हि वयं तेषां पठनं, लेखनं, सङ्ख्यां च शिक्षितुं साहाय्यं कुर्मः। भवान् अतीव बुद्धिमान्, अनुभवी, संवेदनशीलः च अस्ति, तथापि तेषां कार्ये, वेषभूषायाम्, उच्चारणे, शिष्टाचारे वा किमपि नकारात्मकं कथनं न कथनीयमिति।
- **शिक्षार्थिनां सौकर्यं मनसि धारयन्तु** – शिक्षार्थिनाम् अनुसारेण शिक्षण-अध्ययनयोः समयः, स्थानं, सीमा इत्यादीन् निर्धारयन्तु। शिक्षार्थिनां कृते उपवेशनस्य व्यवस्था एतादृशी भवेत् येन ते सुखपूर्वकम् उपवेष्टुं शक्नुयुः, एवञ्च यदा वयं तान् अक्षराणां शब्दानां च उच्चारणं कृत्वा दर्शयामः तदा ते सहजतया द्रष्टुं शक्नुयुः। कटाः आसन्दाः इत्यादीनां व्यवस्था पूर्वमेव करणीया येन वयोवृद्धानां येषां जानुवेदना स्यात् तेषां कृते एकहोरां होराद्वयं वा उपवेशने असौकर्यं न भवेत्।

- **आधार-भूतानाम् आवश्यकतानां व्यवस्था** – यत्र वयं शिक्षार्थिनः पाठयामः तत्र जलस्य व्यवस्था भवेत्। पर्याप्तरूपेण प्रकाशः च भवेत् येन तेषां नेत्रयोः पीडा न भवेत्।
- **शिक्षार्थिनाम् अनुभवस्य कौशलस्य च सम्माननं कुर्वन्तु** – अस्माकं शिक्षार्थिनः जीवनानुभविनः सन्ति। यदि भवान् पठने लेखने शिक्षणे च एतेषाम् अनुभवानां पूर्णं लाभं प्राप्नुयात् तर्हि भवतः कृते पठनं लेखनं शिक्षणं च सुकरं भविष्यति। अस्माकं शिक्षार्थिनः कर्मकराः सन्ति, ते विभिन्नप्रकारकं कौशलं जानीयुः। तेषां कार्यसम्बद्धस्य शब्दकोशस्य, गणितीय-कौशलस्य च पठन-लेखन-शिक्षणे सदुपयोगः कर्तुं शक्यते। पठनलेखनयोः दृष्ट्या भवतः / भवत्याः अवगमनम् अधिकम् अस्ति, परन्तु कार्यस्य जीवनस्य च अनुभवः तेषाम् अधिकं भवेत्। भवान् / भवती तान् आदरपूर्वकं सम्बोधयिष्यति, तेषां वयसः अनुभवानां च पूर्णं सम्माननं करिष्यतीति अपेक्षा।
- **शिक्षार्थिनाम् अधिगम-प्रक्रियां जानन्तु** – भवितुमर्हति यत् अद्य भवता यत् पाठितं तत् ते द्वित्रदिनानाम् अनन्तरं विस्मरेयुः। एतत् अतीव स्वाभाविकम् अस्ति। अतः यत् पूर्वं ज्ञातं तत् पुनः पुनः अभ्यासं कर्तुं तेषां प्रोत्साहनं करणीयम्। प्रत्येकं शिक्षार्थिनः गतिः शिक्षणस्य पद्धतिः च भिन्ना भविष्यति, एतत् मनसि निधाय तेषां स्वगत्या पद्धत्या च शिक्षणं कर्तुं साहाय्यं कुर्वन्तु। शिक्षणे परिवर्तने च कश्चन कालः अपेक्षितः भवति एव अतः धैर्यं धारयन्तु। केन्द्रस्य वातावरणं रुचिकरं कर्तुं मध्ये मध्ये मनोरञ्जनार्थं क्रीडादीनाम् आयोजनं कुर्वन्तु। उत्सवानुसारं गीतानि च गायन्तु। गीतैः, कथाभिः अनुभवेन च वयं शिक्षणाधिगमप्रक्रियायै पाठ्यबिन्दून् संयोजयितुं शक्नुमः। एतेन शिक्षणाधिगमप्रक्रियां रुचिकरं कर्तुं शक्नुमः। शिक्षणार्थं प्रेरणादायकम् आनन्ददायकं च वातावरणम् अत्यावश्यकम् अस्ति।

आधारभूतविषयाणां सङ्ख्यायाः च शिक्षणाधिगमप्रक्रियायाः विषये भवतः / भवत्याः परामर्शानां स्वागतम् अस्ति।

शुभकामनाः

**उषा शर्मा**
आचार्या प्रभारिणी च
राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः
रा.शै.अ.प्र.प., नवदेहली

# निर्माण-समितिः

**अध्यक्षः**

दिनेश प्रसाद सकलानी, निदेशकः, रा.शै.अ.प्र.प. नवदेहली

**परामर्शः**

चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली

प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

अनूप कुमार राजपूत, आचार्यः (प्रोफेसर) एवम् अध्यक्षः, प्रकाशनप्रभागः, रा.शै.अ.प्र.प. नवदेहली

रंजना अरोड़ा, आचार्या (प्रोफेसर) एवम् अध्यक्षा, पाठ्यचर्या अध्ययनविभागः, रा.शै.अ.प्र.प. नवदेहली

संध्या सिंह, आचार्या (प्रोफेसर) एवम् अध्यक्षा, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प. नवदेहली

श्रीधर श्रीवास्तव, संयुक्तनिदेशकः, रा.शै.अ.प्र.प. नवदेहली

**निर्माण-समितिः**

डॉ.मनमोहन शर्मा, शोधाध्येता, संयोजकः 'उल्लासः प्रवेशिका' (संस्कृतम्) संस्कृतसंवर्धनप्रतिष्ठानम्

प्रदीप पौडेल, शोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

विष्णु प्रसाद उपाध्याय, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

गानमूर्ति, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

डॉ.श्रीधर, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

खगेन्द्र दहाल, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

राम शर्मा, शोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

प्रवीण न्यौपाने, शोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

उमेश कुमार पाण्डेय, अनुवादकः संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

नरेन्द्र शर्मा, अनुवादकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

जया टंडन, अनुवादिका, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

सुनील कुमार शर्मा, परियोजना-सहायकः भारतीयज्ञानपरम्परा, नवदेहली

**समीक्षा-समितिः**

प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

डॉ.जितेन्द्र मोहन शर्मा, आचार्यः, रा.शै.अ.प्र.प. नवदेहली

डॉ.देवकीनन्दन, सहायकाचार्यः, रा.शै.अ.प्र.प. नवदेहली

डॉ.नितिन कुमार जैन, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

डॉ.परमेश कुमार शर्मा, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

लक्ष्मीनरसिंहन्, कार्यपालकाधिकारी, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

डॉ.मनमोहन शर्मा, वरिष्ठशोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्

**समन्वयन-सदस्या**

उषा शर्मा, आचार्या एवं प्रभारिणी, राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

# कृतज्ञता

अस्मिन् पुस्तके येषां साहित्यरचनाः स्वीकृताः परिषद् तेषां सर्वेषां विदुषां कृतज्ञतां प्रकटयति । रचनानां प्रकाशनाय अनुमतिं प्रदत्तवन्तं भोपाल-नगरस्य 'एकतारा' इति संस्थायाः निदेशकं सुशीलशुक्लं, (दीपावल्याः प्रदीप्ताः दीपकाः); भोपाल-नगरस्य, लोक-चित्रकारं सुभाषव्यामं दुर्गाबाईव्यामं च, (जलवाहिनी), स्वर्गवासिनं निरङ्कारदेवसेवकं (समयस्य अनुपालनम्), श्यामसुशीलं (वर्णगीतम्), प्रभातम् (ज्ञानुः ज्ञानी ज्ञानं तथा च सेव्यतां संस्कृतम्), निशातफ़ारूकम् (सहायता तु प्राप्ता किन्तु कथं एवञ्च मम लेखा मम प्रतिष्ठा), लोक-कथा-निमन्त्रणम्, (अनुपम कहानियाँ) (सेवानिवृत्तम्) कार्यकारि-निदेशकं (रेलवेबोर्ड) प्रेमपालशर्माणम् (गान्धिनः आत्मकथायाः), अजमेर-नगरस्य क्षेत्रीय-शिक्षा-संस्थानस्य शिक्षा-विभागस्य अध्यक्षम् आयुष्मान्-गोस्वामिनं (कथाः) च प्रति परिषद् कार्तज्ञ्यं प्रकटयति ।

पुस्तके चित्राङ्कनाय इयं परिषद् नव-देहलीनगरस्य शशि-शेट्ये-वर्यं; राजस्थान-राज्यस्य जयपुर-नगरस्य लोकचित्रकारिकां (माण्डना शैली) सुनीतां; मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) सुभाष-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारिकां (गोंड-भित्ति-शैली) दुर्गाबाई-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) मानसिंह-व्यामं, राजस्थान-राज्यस्य उदयपुर-नगरस्य प्रशान्त-सोनीं, उत्तर-प्रदेशस्य नोएडा-नगरस्य सागर-अरणकल्ले-वर्यं, मध्य-प्रदेशस्य चंदेरी-नगरस्य शुभम-लखेरां, मध्य-प्रदेशस्य ग्वालियर-नगरस्य हबीब-अलीं, मध्य-प्रदेशस्य देवास-नगरस्य जितेन्द्र-चौरसियां, मध्य-प्रदेशस्य धार-नगरस्य हरिओम पाटीदारं, नीलेश-गहलोतं, नव-देहलीनगरस्य तापोशी-घोषालं, नव-देहलीनगरस्य रुचिन-सोनीं, पश्चिम-बङ्गाल-राज्यस्य कोलकाता-नगरस्य मयूख-घोषं, बिहार-राज्यस्य मधुबनी-नगरस्य सच्चिदानन्द-झां, ओडिशा-राज्यस्य भुवनेश्वर-नगरस्य राधाश्याम राउतं बिहार-राज्यस्य मधुबनी-नगरस्य श्रेयसी-दत्तं प्रति च विशिष्टां कृतज्ञतां विज्ञापयति ।

परिषदा भारतीय-निर्वाचन-आयोगस्य, राष्ट्रिय-मतदातृ-सेवा-सञ्जालस्य, भारतीय-कृषि-अनुसन्धान-केन्द्रस्य, सामाजिक-न्याय-अधिकारिता-मन्त्रालयस्य, प्रधानमन्त्रि-जन-धन-योजनायाः, राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणस्य, राष्ट्रिय-साक्षरता-मिशन-प्राधिकरणस्य, मध्य-प्रदेशस्य इन्दौर-नगरस्य राज्य-संसाधन-केन्द्रस्य च कृतज्ञता मन्यते यस्य जालपुटात् प्रवेशिकायाः निर्माणार्थम् उपयोगिन्यः सामग्र्यः चित्राणि च स्वीकृतानि ।

परिषद् प्रवेशिकायाः विकासाय विभिन्न-चरणेषु सहयोगाय राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठस्य परामर्शदातारं अमनगुप्ता-महोदयं प्रति एवञ्च नवदेहलीस्थितस्य संस्कृतसंवर्धनप्रतिष्ठानस्य परियोजना-अधिकारिणं शंकरलाल-सोनी-वर्यं, पुस्तकस्वरूपं (Indigene work) प्रदत्तवतः रीता-विनोद-पङ्कज-इत्येतान् (मुक्तकर्मिणः) प्रति एवञ्च ग्राफिक-विन्यासकारिके सोनम-मिताल्यौ प्रति च कृतज्ञतां प्रकटयति । एतेषां/एतासां महता सहयोगेन इदं कार्यं निर्विघ्नतया सुसम्पादितम् ।

## यदि भवान्/भवती...........


पठनम् एवं परीक्षाम् आश्रित्य


वैयक्तिक-सम्बन्धान् आश्रित्य


आजीविकाम् आश्रित्य


मित्राणां दुर्व्यवहारेण च

**पीडितः/पीडिता, चिन्तितः/चिन्तिता वर्तते तर्हि परामर्शकस्य सहायतां स्वीकरोतु।**



दूरवाणीं कुर्वन्तु
८४४८४४०६३२

राष्ट्रिया निश्शुल्क-परामर्श-दूरभाष-संख्या
प्रातः ८ वादनतः रात्रौ ८ वादन-पर्यन्तम् प्रतिदिनम्।

## मनोदर्पणम्

कोविड-१९ इत्यस्य प्रकोप-काले तत्पश्चादपि विद्यार्थिनां मानसिक-स्वास्थ्य-लाभार्थम्
एवं कल्यार्थं मनोसामाजिक-सहायता
(आत्मनिर्भर-भारत-अभियानस्य अन्तर्गतः, शिक्षा मन्त्रालयः, भारत-सर्वकारस्य एकः उपक्रमः)

**www.https://manodarpan.education.gov.in**

# विषयसूची:


*आमुखम्* *iii*

*स्वयंसेवि-शिक्षकान् उद्दिश्य* *v*

**वर्ण-परिचयः** **२–५५**

- स्वर-वर्णाः
- व्यञ्जन-वर्णाः
- संयुक्त-वर्णाः
- *वर्णमाला*

**१. परिवारः प्रतिवेशः च** **५६–७७**

- अ, आ, न, प, स, र, व
- रमायाः परिवारः
- १ तः ९ पर्यन्तं सङ्ख्या-परिचयः, पठनं लेखनं च।
- वर्णगीतम्

**२. संवादः** **७८–१०७**

- इ, ई, ब, त, म, ख, ट, च
- विद्यालयाय पत्रम्
- १० तः २० पर्यन्तं सङ्ख्या-परिचयः, पठनं लेखनं च।
- २० पर्यन्त-सङ्ख्यानां सङ्कलनं व्यवकलनं च।
- 'अंधेर'नगरी, 'चौपट'राजा, टङ्कसेटकं शाकम्, टङ्कसेटकं खाजा

**३. अस्माकम्-जीवनशैली** **१०८–१४०**

- ओ, औ, झ, द, ल, ग, क, य
- दीपावल्याः दीपकाः
- २१ तः ५० पर्यन्तं संख्यानां परिचयः, पठनं लेखनं च
- गुणनादीनां ज्ञानम्
- ५० पर्यन्तं संख्यानां योगः(सङ्कलनम्) व्यवकलनं च।
- कथा